[This question paper contains 2 printed pages.]

**Roll Number :**

**Unique Paper Code : 121303408 OEC**

**Title of the Paper : Sanskrit Novel and Survey of Modern SanskritLiterature**
**संस्कृत उपन्यास तथा आधुनिक संस्कृत साहित्य का सर्वेक्षण**

**Name of the Course : MA Sanskrit Examination, May 2023**

**Semester : IV**

**Duration : 3 Hours**

**Maximum Marks : 70**

इस प्रश्नपत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाङ्क लिखिए।
(Write Your Roll No. on the top immediately on receipt of this question paper.)

**टिप्पणीः** अन्यथा आवश्यक न होने पर इस प्रश्नपत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** में से किसी एक भाषा में दीजिए।

**Note:** Unless otherwise required in a question, answers should be written either in Sanskrit **or** in Hindi **or** in English.

**सभी प्रश्नों के उत्तर दीजिए।**
**Attempt all questions.**

1. **निम्नलिखित की सप्रसङ्ग व्याख्या कीजिए –** **7X4=28**
**Explain the following with context –**

(i) कर्मणाऽहं चौरः। अप्यहं व्यवसायमिमं त्यक्ष्यामि कर्हिचन? अनुगृहीतोऽस्मि विचित्रबन्धोर्महाकारुणिकस्य तस्य तपस्विनो येन स्वर्णनिचयः प्रभूत एष मह्यं स्वयमेव दत्तः। किमधुना कुर्याम्? कुत्र यायाम्? कथं वा कुत्र वा गोपयेयं स्वर्णराशिमिमम्? अथवा गत्वा राजकुलं स्वयमेव समर्पयामि सर्वमिदं स्वर्णं राज्ञे प्राप्नोमि च पुरस्कारमाजीविकां च। ततः परमहमपि शिष्टजन इव वर्त्तिष्ये। इत्थमकारणानुकम्पस्य तस्य महात्मनोऽनुभावान्मादृशः कदर्योऽपि भजिष्यते जन आर्यतां विहरिष्यति च चतसृषु दिक्षु निर्भीकः स्वच्छन्दम्।

**अथवा/or**

उपस्थितः सन्ध्याकालः। प्रतिनिवर्त्तितव्यमिदानीमित्याकलय्य समुत्तस्थौ राजा। समुत्तस्थुः सर्वेऽप्यतिथयः। ब्रह्मर्षिं गुरुकुलमातरं च प्रथमं प्रणमाम राजकुमारी। ब्रह्मर्षिस्तु 'स्वस्ति दुहित'रिति प्रत्यभिवाद्य पुनर्मौनं भेजे। गुरुकुलमाता गाढं परिष्वज्य तां शिरसि भृशं चुचुम्ब चावादीच्च 'सारभूता त्वमसि विधातुर्दिव्यसौन्दर्यसर्गस्य। सौम्येयं ते सुन्दरता प्रसभमाकृषति युगपन्मम हृदयमपि दृष्टिमपि। पुनः पुनरागच्छाश्रमपदं दुहितः। सर्वेऽपि कामास्ते सन्तु सत्याः। सुखं वर्धस्व। लभस्व सर्वं लभ्यम्। भुङ्क्ष्व चतुरोऽपि पुरुषार्थान्।

(ii) सहस्रशीर्षा ननु सहस्राक्षः सहस्रपादस्ति प्रेमपुरुषः। अनेकानि सन्ति रम्याणि च घोराणि तस्य रूपाणि। अनेके सन्ति मृदुलाः सरला कठोरा वक्राश्च तस्य पन्थानः। जानन्नपि नाहं त्वामध्यापयं विस्तरशः प्रेमशास्त्रम्। नाहमध्यापयिष्याम्यपि। स्वयं प्रकृतिस्त्वामध्यापयिष्यति यथासमयं सर्वम्। अहर्निशं प्रवर्तमाना व्यापका हि भवन्त्युपदेशाः प्रकृतेः सर्वतन्त्रस्वतन्त्रयाः। प्रकृतशास्त्रविषये न त्वया ते ग्रहीतुमपार्यन्तेत्यत्रहमेवापराध्यामि।मयैव हितबुद्धिना धृतं त्वदीयं संस्कारातपत्रं न्यवारयत् प्रवाहाँस्तान्सुदुर्वारानुपदेशानां भीषणरमणीयानां तत्तेषाम्।

**अथवा/or**

प्रासीदत् तमवलोक्यैव कुमारः। सत्त्वसिद्धेः सार्वभौमतायाः प्रथमः सिद्धः प्रयोग एष पक्षपातविशेषं कमपि सदैवाभजत कुमारस्य। अचीकमन्त तं सर्वेऽपि राजकुले राजपुरुषकुलेषु प्रजासु च। राज्ञः स परमं विश्वासभाजनमासीत्। अरञ्जयन्मनांसि सर्वेषां कदाचित् स भक्त्यावेशकैर्भगवन्नामकीर्तनैः, कदाचन हासपरिहासकथाभिः कदाचिदद्भुतसाहसिक्यकथाभिः कदाचिद्देशविदेशयात्रावृत्तान्तैश्च। किमपि नासीदसम्भवं तस्य कार्यम्। सर्वत्र सुलभः कार्यकर्ता स सेवकः सर्वेषाम्।

(iii) राजा लोकबन्धुर्नाम्ना मनसा वचसा कर्मणा च तथैवाभवत्। उपदेशक एव स महर्षेरनुभावात् सर्वमसाधयत् साध्यं कल्याणाय निखिलराजप्रजाकुलस्य। जाते राज्याभिषेके तु संक्रान्तो भयकुलोदात्तसंस्कारसमन्वयः स रात्रिन्दिवं सर्वेषामभ्युदयनिःश्रेयससाधनं त्रिविधदुःखात्यन्तनिवृत्तिसाधनं च धर्मं संकल्पयामास धारयामास च गेहे गेहे। नासम्मानित उपेक्षितो वा वृद्धः क्वचिदवालोक्यते तस्य राज्ये। नास्वस्थः कश्चिदलसः कर्मभीरुरकर्मा तरुणः कुतोऽप्यदृश्यत। नाहसितवदनः शिशू रुग्णः कृशो वाऽलालितः क्वचिदलभ्यत।

**अथवा/or**

तत्रैवासीन् नदी निर्मलवारिधारा कलकलनिनादिनी रामणीयकं सहजमकृत्रिमं दधती। उपायुञ्जस्ता कृषका, नाविकाः शिशवस्तरुणा, वृद्धा, विद्वांसः, कलाकाराः संस्कृता असंस्कृताश्च। नास्ति नासीन्न भविष्यति वा कश्चित्तस्याः स्वकीयः परकीयो वा। सेवते सा सर्वाञ्जलार्थिनः। निर्मलीकरोति समलान्। सरसीकरोति नीरसान्। शीतलीकरोति वाशीतलान्। स्वभावनियतानि कर्माणि कुर्वतां सर्वे, यथाशक्ति यथाप्रतिभं भुञ्जतां च सर्वमावश्यकं सम्यगाराधितान् निसर्गमहानिधेरक्षय्यादित्येवाभिलषति निसर्गोऽपि परमकारुणिकः।

(iv) ददर्श स मातुः क्षुधितास्ताडयन्तीर्निर्घृणं शिशून् कृशान् क्षुधितान्। ददर्श स ताड्यमानान् कृषिश्रमिकान् धनदुर्मदान्धेः सर्वहरेरखिलोकृतवतोऽपि खिलक्षेत्राणि क्षुधितान् क्षीयमाणान्। ददर्श स कलहायमानान् दण्डादण्डि केशाकेशि सगोत्रानगोत्रान् भ्रातृन् प्रतिवेशिनः। ददर्श स बहिर्धनपतिगृहेभ्य उत्करप्रक्षिप्तान् रोटिकाखण्डान् आच्छिन्दन्तं दन्तादन्ति द्रविणविद्यासंस्कारहीनं मनोवाक्कायदरिद्रलोकमसहायमपरिच्छदं कृशं दयनीयम्। ददृशाते दम्पती कावपि कनककान्तिपरिगृहीतमानसौ विसृजन्तावन्योन्यं विस्मारितानुरागभावमुपयुक्तपीतमृत्पात्रकल्पो निष्करुणौ।

**अथवा/or**

मनोहरोऽस्ति परमभक्तः कुमारस्य। सशुकः स यदाऽमरावतीमगच्छत्तदा दूरादेव सोऽपश्यत् कुमारमासीनं लोकपालगृहबहिर्द्वारपरिसरे। तत्र गत्वा तमनवाप्य च नूनं निववृते निराशस्तद्-गृहात्। किन्तु तस्मिन्नेव चतुष्पथे प्रतिदिशमवलोकयन् स दूरादपश्यत् कुमारं गच्छन्तं राजधानीं प्रति पर्यचिनोच्च तं तद्गत्या। नाभिनन्दिष्यति कुमारस्तदनुगमनमिति कृत्वा स तमननुगम्य समागत आश्रमपदम्। तदानीमेव तस्य शुकं जिघांसोर्दुर्भटस्याकार्य-चिकीर्षाऽनुतापानलदग्धाशेषमानसवाचिककायिकपातकपुञ्जस्य पुनः पुनरत्याग्रहात् तातपादैरेक एव दण्डो व्यधायि 'भव सर्वत्र सर्वदा सहायको निष्ठावान् वारुणराज्यशान्तिसेनाध्यक्षस्य मनोहरस्येति।'

2. मनोहर **अथवा** राधा का चरित्रचित्रण कीजिए। 10
Describe the character of Manohara **or** Rādhā.

3. प्रमुख आधुनिक संस्कृत महाकाव्यों पर एक निबन्ध लिखिए। 10
Write an essay on main modern Sanskrit epics.

**अथवा/or**

अम्बिकादत्त व्यास के व्यक्तित्व एवं कर्तृत्व पर एक निबन्ध लिखिए।

Write an essay on life and work of Ambikadatta Vyasa.

4. निम्नलिखित में से **किन्हीं चार** पर टिप्पणी लिखिए, जिनमें से कोई **एक** टिप्पणी **संस्कृत** में हो।

Write short note on any **four** of the following, out of which **one** should be in **Sanskrit**.

5+5+5+7=22

| | |
|---|---|
| (क) ब्रह्मर्षि का चरित्र–चित्रण | Characterization of Brahmrṣi |
| (ख) कुमार का चरित्र–चित्रण | Characterization of Kumāra |
| (ग) कुमार के उपदेश का प्रभाव | Effects of Kumar's preaching |
| (घ) राधा की विरहावस्था का वर्णन | Description of Radha's separation |
| (ङ) परमानन्द शास्त्री | Parmanand Shastri |
| (च) हरिदास सिद्धान्तवागीश | Haridasa Siddhantavageesha |
| (छ) मूलशंकर माणिकलाल याज्ञिक | MoolshankarManiklalYagnika |
| (ज) जानकीवल्लभ शास्त्री | Jankivallabha Shastri |